# Tapi Stotram

# तापीस्तोत्रम्

## Document Information

Text title : Tapi Stotram

File name : tApIstotram.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI, aShTaka

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# तापीस्तोत्रम्

छाया विवस्वद्दुहिता हितार्था पुरातनी त्वत्र धुनी कृतार्था ।
ययाऽऽस भूरन्यविभूषितापि तापीसरित्साऽवतु मां स्मृतापि ॥ १॥

तपती पतिमाप्तुमुद्गता वरविन्ध्याद्रिपदान्महोन्नता ।
प्रययौ नवयौवनाञ्चिता जलधिं पश्चिमकं ह्यवञ्चिता ॥ २॥

पुनानापि नानाजनानंहसोऽत्र पदं राति याति प्रशस्तं परत्र ।
यदीये प्रतीरेऽत्र पापी न तापी न कोपीयमस्मानवत्वत्र तापी ॥ ३॥

भुजङ्गप्रयातोपमा यद्गतिर्या मतिं नः पुनाना ददाना गतिं या ।
वरं पश्चिमाब्धि सुखेनोपमेये हतत्वद्य तान् पाप्मनः सन्ति ये मे ॥ ४॥

अवरजा वरजातिसुपूजिता द्युमणिजा मणिजातिविभूषिता ।
सुतपती तपती पतितान्नतावती सा यशसा पयसान्विता ॥ ५॥

या वारयत्याशु यदिन्द्रवज्रलेपोपमं पातकमाप्लवेन ।
प्लवेन यज्ञेन तथा गतिर्न यथा नदी राति सहाप्लवेन ॥ ६॥

जगति तपनशीला याहि तापी सुशीला,
चलति भुवि विशाला मुक्तिपानीयशाला ।
परिहृतजनकाला खेलदुच्चोर्मिमाला,
निखिलसुकृतपाला पातु नः सूर्यबाला ॥ ७॥

अये तापीहापि प्रशमितभये ते सुखमये,
सदा दत्तात्रेयो निवसति सतिप्रार्पितनये ।
न ये त्वां सेवन्ते त इह जनिभाजोऽत्र भजते,
गतिः सद्यो रासीत्यत ऋषिगणस्त्वां हि भजते ॥ ८॥

दत्तात्रेयादृतां तापीं पापिनिर्मुक्तिमष्टभिः ।
पद्यैस्तुष्टाव सुकृती वासुदेवसरस्वती ॥ ९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं तापीस्तोत्रं सम्पूर्णम् ।

*Tapi Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*